[A]ट्वलितः, इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकचलतिवत् (510) ज्ञेयानि।

(646) "डप सङ्घाते" (X-चुरादिः-1677. अक. सेट्. आत्म. आकुस्मीयः)

डापकः-पिका, डिडापयिषकः-षिका, डापयमानः, इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकगालयतिवत् (388) ज्ञेयानि। [B]संडापितः।

(647) "डिप क्षेपे" (IV-दिवादिः-1232. सक. सेट्. पर.)

'सङ्घाते डेपयेतेति, क्षेपे डिपति डिप्यति।' (श्लो० 134) इति देवः।

[C]डेपकः-पिका, डेपकः-पिका, डिडेपिषकः-डिडिपिषकः-षिका, डेडिपकः-पिका; इत्यादीनि सर्वाण्यपि रूपाणि दैवादिककुप्यतिवत् (224) ज्ञेयानि।

(648) "डिप क्षेपे" (VI-तुदादिः-1371. सक. सेट्. पर. कुटादिः।)

डेपकः-पिका, डेपकः-पिका, डिडिपिषकः-षिका, डेडिपकः-पिका; [D]डिपन्-न्ती-ती, डिपित्वा, इत्यादीनि सर्वाण्यपि रूपाणि तौदादिककुटतिवत् (204) ज्ञेयानि।

(649) "डिप क्षेपे" (X-चुरादिः-1672. सक. सेट्. उभ.)

'डेपयेदिति चत्वारि णिचि शे श्यनि णौ डिपेः॥' (श्लो. 134) इति देवः।

डेपकः-पिका, डिडेपयिषकः-षिका; डेपयिता-त्री, डिडेपयिषिता-त्री; डेपयन्-न्ती, डिडेपयिषन्-न्ती; डेपयिष्यन्-न्ती-ती, डिडेपयिषिष्यन्-न्ती-ती; डेपयमानः, डिडेपयिषमाणः; डेपयिष्यमाणः, डिडेपयिषिष्यमाणः; डेप्-डेपौ-डेपः; डेपितम्-तः, डिडेपयिषितः-तवान्; डेपः, [1]प्रतिमल्लडेपी,[E]

---

1. 'सुप्यजातौ—' (3-2-78) इति ताच्छील्ये णिनिः।

A. 'ज्वालेन तापेन चला जडाङ्गीरटालशोकट्वलितप्रतापाः॥' धा. का. 2.21.

B. 'संडापितः सदसि डेपितवृष्णिवीरे भोजेन्द्रतन्त्रणविनिन्द्यममन्त्रतैवम्॥' धा. का. 3.33.

C. 'रुष्यद्रिष्यदरातिडेपक विभो कोपादिगोपो न ते
क्लिश्यायोप्यविरोपिलोपक न वा लोभादिसंक्षोभिता।' धा. का. 2.67.

D. 'ततोऽतिकुटिलाशयैः प्रपुटितैः कुचज्जीवितै-
र्गुजद्भिरपि सैनिकैः सुगुडितां डिपद्भिर्जनान्।' धा. का. 2-80.

E. 'इत्थं वदत्यसुरजासिनि पिण्डिताय-
स्थेमाऽथ रोषितमतिः प्रतिमल्लडेपी।' धा. का. 3-32.